श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चतुर्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्विंशः सर्गः ॥

## श्रीरामेण लक्ष्मणं प्रति लङ्काशोभां वर्णयित्वा सेनां व्यूह्य स्थापयितुमादेशः, श्रीरामाज्ञया मुक्तेन शुकेन रावणमुपगम्य तदग्रे श्रीरामसैन्यशक्तेः प्राबल्यस्य वर्णनं रावणेन स्वबलस्य विकत्थनं च

सा वीरसमिती राज्ञा विरराज व्यवस्थिता।
शशिना शुभनक्षत्रा पौर्णमासीव शारदी॥ **6.24.1** ॥

प्रचचाल च वेगेन त्रस्ता चैव वसुन्धरा।
पीड्यमाना बलौघेन तेन सागरवर्चसा॥ **6.24.2** ॥

ततः शुश्रुवुराकृष्टं लङ्कायां काननौकसः।
भेरीमृदङ्गसङ्घुष्टं तुमुलं लोमहर्षणम्॥ **6.24.3** ॥

बभूवुस्तेन घोषेण संहृष्टा हरियूथपाः।
अमृष्यमाणास्तद् घोषं विनेदुर्घोषवत्तरम्॥ **6.24.4** ॥

राक्षसास्तत् प्लवङ्गानां शुश्रुवुस्तेऽपि गर्जितम्।
नर्दतामिव दृप्तानां मेघानामम्बरे स्वनम्॥ **6.24.5** ॥

दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम्।
जगाम मनसा सीतां दूयमानेन चेतसा॥ **6.24.6** ॥

अत्र सा मृगशावाक्षी रावणेनोपरुध्यते।
अभिभूता ग्रहेणेव लोहिताङ्गेन रोहिणी ॥ **6.24.7** ॥

दीर्घमुष्णं च निःश्वस्य समुद्वीक्ष्य च लक्ष्मणम्।
उवाच वचनं वीरस्तत्कालहितमात्मनः ॥ **6.24.8** ॥

आलिखन्तीमिवाकाशमुत्थितां पश्य लक्ष्मण।
मनसेव कृतां लङ्कां नगाग्रे विश्वकर्मणा ॥ **6.24.9** ॥

विमानैर्बहुभिर्लङ्का सङ्कीर्णा रचिता पुरा।
विष्णोः पदमिवाकाशं छादितं पाण्डुभिर्घनैः ॥ **6.24.10** ॥

पुष्पितैः शोभिता लङ्का वनैश्चित्ररथोपमैः।
नानापतगसङ्घुष्टफलपुष्पोपगैः शुभैः ॥ **6.24.11** ॥

पश्य मत्तविहङ्गानि प्रलीनभ्रमराणि च।
कोकिलाकुलखण्डानि दोधवीति शिवोऽनिलः ॥ **6.24.12** ॥

इति दाशरथी रामो लक्ष्मणं समभाषत।
बलं च तत्र विभजच्छास्त्रदृष्टेन कर्मणा ॥ **6.24.13** ॥

शशास कपिसेनां तां बलादादाय वीर्यवान्।
अङ्गदः सह नीलेन तिष्ठेदुरसि दुर्जयः ॥ **6.24.14** ॥

तिष्ठेद् वानरवाहिन्या वानरौघसमावृतः।
आश्रितो दक्षिणं पार्श्वमृषभो नाम वानरः ॥ **6.24.15** ॥

गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः।
तिष्ठेद् वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः ॥ **6.24.16** ॥

मूर्ध्नि स्थास्याम्यहं यत्तो लक्ष्मणेन समन्वितः।
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ॥ **6.24.17** ॥

ऋक्षमुख्या महात्मानः कुक्षिं रक्षन्तु ते त्रयः।
जघनं कपिसेनायाः कपिराजोऽभिरक्षतु।
पश्चार्धमिव लोकस्य प्रचेतास्तेजसा वृतः॥ **6.24.18** ॥

सुविभक्तमहाव्यूहा महावानररक्षिता।
अनीकिनी सा विबभौ यथा द्यौः साभ्रसम्प्लवा॥ **6.24.19** ॥

प्रगृह्य गिरिशृङ्गाणि महतश्च महीरुहान्।
आसेदुर्वानरा लङ्कां मिमर्दयिषवो रणे॥ **6.24.20** ॥

शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा।
इति स्म दधिरे सर्वे मनांसि हरिपुङ्गवाः॥ **6.24.21** ॥

ततो रामो महातेजाः सुग्रीवमिदमब्रवीत्।
सुविभक्तानि सैन्यानि शुक एष विमुच्यताम्॥ **6.24.22** ॥

रामस्य तु वचः श्रुत्वा वानरेन्द्रो महाबलः।
मोचयामास तं दूतं शुकं रामस्य शासनात्॥ **6.24.23** ॥

मोचितो रामवाक्येन वानरैश्च निपीडितः।
शुकः परमसन्त्रस्तो रक्षोधिपमुपागमत्॥ **6.24.24** ॥

रावणः प्रहसन्नेव शुकं वाक्यमुवाच ह।
किमिमौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे॥ **6.24.25** ॥

कच्चिन्नानेकचित्तानां तेषां त्वं वशमागतः।
ततः स भयसंविग्नस्तेन राज्ञाभिचोदितः।
वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम्॥ **6.24.26** ॥

सागरस्योत्तरे तीरेऽब्रुवं ते वचनं तथा।
यथा सन्देशमक्लिष्टं सान्त्वयञ्श्लक्ष्णया गिरा॥ **6.24.27** ॥

क्रुद्धैस्तैरहमुत्प्लुत्य दृष्टमात्रः प्लवङ्गमैः।
गृहीतोऽस्म्यपि चारब्धो हन्तुं लोप्तुं च मुष्टिभिः॥ **6.24.28** ॥

न ते सम्भाषितुं शक्याः सम्प्रश्नोऽत्र न विद्यते।
प्रकृत्या कोपनास्तीक्ष्णा वानरा राक्षसाधिप॥ **6.24.29** ॥

स च हन्ता विराधस्य कबन्धस्य खरस्य च।
सुग्रीवसहितो रामः सीतायाः पदमागतः॥ **6.24.30** ॥

स कृत्वा सागरे सेतुं तीर्त्वा च लवणोदधिम्।
एष रक्षांसि निर्धूय धन्वी तिष्ठति राघवः॥ **6.24.31** ॥

ऋक्षवानरसङ्घानामनीकानि सहस्रशः।
गिरिमेघनिकाशानां छादयन्ति वसुन्धराम्॥ **6.24.32** ॥

राक्षसानां बलौघस्य वानरेन्द्रबलस्य च।
नैतयोर्विद्यते सन्धिर्देवदानवयोरिव॥ **6.24.33** ॥

पुरा प्राकारमायान्ति क्षिप्रमेकतरं कुरु।
सीतां चास्मै प्रयच्छाशु युद्धं वापि प्रदीयताम्॥ **6.24.34** ॥

शुकस्य वचनं श्रुत्वा रावणो वाक्यमब्रवीत्।
रोषसंरक्तनयनो निर्दहन्निव चक्षुषा॥ **6.24.35** ॥

यदि मां प्रति युद्धेरन् देवगन्धर्वदानवाः।
नैव सीतां प्रदास्यामि सर्वलोकभयादपि॥ **6.24.36** ॥

कदा समभिधावन्ति मामका राघवं शराः।
वसन्ते पुष्पितं मत्ता भ्रमरा इव पादपम्॥ **6.24.37** ॥

कदा शोणितदिग्धाङ्गं दीप्तैः कार्मुकविच्युतैः।
शरैरादीपयिष्यामि उल्काभिरिव कुञ्जरम्॥ **6.24.38** ॥

तच्चास्य बलमादास्ये बलेन महता वृतः।
ज्योतिषामिव सर्वेषां प्रभामुद्यन् दिवाकरः॥ **6.24.39** ॥

सागरस्येव मे वेगो मारुतस्येव मे बलम्।
न च दाशरथिर्वेद तेन मां योद्धुमिच्छति॥ **6.24.40** ॥

न मे तूणीशयान् बाणान् सविषानिव पन्नगान्।
रामः पश्यति सङ्ग्रामे तेन मां योद्धुमिच्छति॥ **6.24.41** ॥

न जानाति पुरा वीर्यं मम युद्धे स राघवः।
मम चापमयीं वीणां शरकोणैः प्रवादिताम्॥ **6.24.42** ॥

ज्याशब्दतुमुलां घोरामार्तगीतमहास्वनाम्।
नाराचतलसन्नादां नदीमहितवाहिनीम्।
अवगाह्य महारङ्गं वादयिष्याम्यहं रणे॥ **6.24.43** ॥

न वासवेनापि सहस्रचक्षुषा
    युद्धेऽस्मि शक्यो वरुणेन वा स्वयम्।
यमेन वा धर्षयितुं शराग्निना
    महाहवे वैश्रवणेन वा पुनः॥ **6.24.44** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्विंशः सर्गः॥